# हिर्ण्यकेशिनाम् प्रयोगाः

अथ हिरण्यकेशिनाम् पुण्याहवाचन-विधि :-
हरिद्रा-बिम्बे गणपति-स्थापनम् :-
गणानां त्वा गणपतिँ हवामहे कविं कवीनाम् उपमश्रवस्तमम् ।
ज्येष्ठराजम् ब्रह्मणाम् ब्रह्मणस् पत आ नः शृण्वन्न् ऊतिभिः सीद सादनम् ॥

पुष्पाञ्जलिं दत्वा सर्वोपचारैः संपूज्य :-
मन्त्रहीनं क्रियाहीनं भक्तिहीनं गजानन ।
यत् पूजितं मया देव परिपूर्णं तद् अस्तु मे ॥

विघ्नेश्वराय वरदाय सुरप्रियाय
लम्बोदराय विकटाय गजाननाय ।
विनायकाय श्रुति-यज्ञविभूषिताय
गौरीसुताय गणनाथा नमो नमस् ते ॥

कलष-स्थापनम् :-
कलशत्रयं स्थापयेत् ।

मही द्यौः पृथिवी च न इमं यज्ञम् मिमिक्षताम् ।
पिपृतां नो भरीमभिः ॥

तयोः पञ्चरत्नानि प्रक्षिपेत् :-
युवा सुवासाः परिवीत आगात् । स उ श्रेयान् भवति जायमानः । तं धीरासः कवय उन्नयन्ति । स्वाधियो मनसा देवयन्तः ।

कलशोपरि वस्त्रवेष्टनं कृत्वा :-
पूर्णा दर्वि परा पत सुपूर्णा पुनर् आ पत ।
वस्नेव वि क्रीणावहा इषम् ऊर्जँ शतक्रतो ॥

कलशे वरुणस्यावाहनम् :-
तत् त्वा यामि ब्रह्मणा वन्दमानस् तद् आ शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्य् उरुशँस मा न आयुः प्र मोषीः ॥

कलश-मुखे अप आवाहयेत् :-
सर्वे समुद्राः सरितस् तीर्थानि जलदा नदाः ।
आयान्तु मम शान्त्य् अर्थं दुरित-क्षय-कारकाः ॥

अभिमन्त्रणम् :-
द्रविणोदा द्रविणसस् तुरस्य द्रविणोदाः सनरस्य प्र यंसत् ।
द्रविणोदा वीरवतीम् इषं नो द्रविणोदा रासते दीर्घम् आयुः ॥

नवोनवो भवति जायमानो ऽह्नां केतुर् उषसाम् एत्य् अग्रे ।
भागं देवेभ्यो वि दधात्य् आयन् प्र चन्द्रमास् तिरति दीर्घम् आयुः ॥

उच्चा दिवि दक्षिणावन्तो अस्थुर् ये अश्वदाः सह ते सूर्येण ।
हिरण्यदा अमृतत्वम् भजन्ते वासोदाः सोम प्र तिरन्त आयुः ॥

प्रधानाङ्गम् :-
शान्तिर् अस्तु १ । पुष्टिर् अस्तु २ । तुष्टिर् अस्तु ३ । वृद्धिर् अस्तु ४ । अविघ्नम् अस्तु ५। आयुष्यम् अस्तु ६। आरोग्यम् अस्तु ७ । शिवं कर्मास्तु ८ । कर्म-संऋद्धिर् अस्तु ९ । धर्म-संऋद्धिर् अस्तु १० । वेद-संऋद्धिर् अस्तु ११ । शास्त्र-संऋद्धिर् अस्तु १२ । पुत्र-संऋद्धिर् अस्तु १३ । धन-धान्य-संऋद्धिर् अस्तु १४ । इष्ट-संपद् अस्तु १५। अरिष्ट-निरसनम् अस्तु १६ । यत् पापं तत् प्रतिहतम् अस्तु १७ । यच् छ्रेयस् तद् अस्तु १८ । उत्तरे कर्मण्य् अविघ्नम् अस्तु १९ । उत्तरोत्तरम् अहर् अहर् अभिवृद्धिर् अस्तु २० । उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम् २१ । तिथि-करण-मुहूर्त-नक्षत्र-सम्पद् अस्तु २२ । तिथि-करण-मुहूर्त-नक्षत्र-ग्रह-लग्नाधि-देवताः प्रीयन्ताम् २३ । तिथि-करणे मुहूर्त-नक्षत्रे सग्रहे सदैवते प्रीयेताम् २४ । दुर्गा-पाञ्चाल्यौ प्रीयेताम् २५ । अग्नि-पुरोगा विश्वे देवाः प्रीयन्ताम् २६ ।इन्द्र-पुरोगा मरुद्गणाः प्रीयन्ताम् २७ । ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् २८ ।विष्णु-पुरोगाः सर्वे देवः प्रीयन्ताम् २९ । माहेश्वरी-पुरोगा उमा-मातरः प्रीयन्ताम् ३० । वसिष्ठ-पुरोगा ऋषि-गणाः प्रीयन्ताम् ३१ । अरुन्धती-पुरोगा एकपत्न्यः प्रीयन्ताम् ३२ । ऋषयश् छन्दांस्य् आचार्या देवा वेदा यज्ञाश् च प्रीयन्ताम् ३३ । ब्रह्म च ब्राह्मणाश् च प्रीयन्ताम् ३४ । श्री-सरस्वत्यौ प्रीयेताम् ३५ । श्रद्धा-मेधे प्रीयेताम् ३६ । भगवती कात्यायनी प्रीयताम् ३७ । भगवती माहेश्वरी प्रीयताम् ३८ । भगवती पुष्टिकरी प्रीयताम् ३९ । भगवती तुष्टिकरी प्रीयताम् ४० । भगवती ऋद्धिकरी प्रीयताम् ४१ । भगवती वृद्धिकरी प्रीयताम् ४२ । भगवन्तौ विघ्न-विनायकौ प्रियेताम् ४३ । भगवान् स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्व-स्थान-गतः प्रीयताम् ४४ । हरि-हर-हिरण्यगर्भाः प्रीयन्ताम् ४५ । सर्वा ग्रम-देवताः प्रीयन्ताम् ४६ । सर्वा कुल-देवताः प्रीयन्ताम् ४७ । सर्वा इष्ट-देवताः प्रीयन्ताम् ४८।हता ब्रह्म-द्विषः ४९ । हताः परिपन्थिनः ५० । हता अस्य कर्ंअणो विघ्न-कर्तारः ५१ । शत्रवः पराभवं यान्तु ५२ । शाम्यन्तु घोराणि ५३ । शाम्यन्तु पापानि ५४ । शाम्यन्त्व् ईतयः ५५ । शुभानि वर्धन्ताम् ५६ । शिवा आपः सन्तु ५७ । शिवा ऋतवः सन्तु ५८ । शिवा अग्नयः सन्तु ५९ । शिवा आहुतयः सन्तु ६० । शिवा ओषध्यः सन्तु ६१ । शिवा वनस्पतयः सन्तु ६२ । शिवा अतिथयः सन्तु ६३ । अहोरात्रे शिवे स्याताम् ६४ । निकामे निकामे नः पर्जन्यो वर्षतु ६५ । फलिन्यो न ओषधयः पच्यन्ताम् ६६ । योग-क्षेमो नः कल्पताम् ६७ । आदित्य-पुरोगाः सर्वे ग्रहाः प्रीयन्ताम् ६८ । भगवान् नारायणः प्रीयताम् ६९ । भगवान् पर्जन्यः प्रीयताम् ७० । भगवान्

स्वामी महासेनः प्रीयताम् ७१ ॥

प्रतिवाक्यम् पात्रे जलम् पातयेत् । तत्र+अरिष्ट-निरसनम् अस्तु, यत् पापं तत् प्रतिहतम् अस्तु इति द्वाभ्यां वाक्याभ्यां हता ब्रह्म-द्विष इत्य् आदिभिः सप्तभिर् वाक्यैश् च पात्राद् बहिर् उत्तरतो जलम् पातनीयम् ।

स्वस्ति-वचनम् :-
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस् तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर् दधातु ॥

स्वस्ति नो मिमीताम् अश्विना भगः स्वस्ति देव्य् अदितिर् अनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥
स्वस्तये वायुम् उप ब्रवामहै सोमं स्वस्ति भुवनस्य यस् पतिः ।
बृहस्पतिं सर्वं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥
विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुर् अग्निः स्वस्तये ।
देवा अवन्त्व् ऋभवः स्वस्तये स्वस्ति नो रुद्रः पात्व् अंहसः ॥
स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश् चाग्निश् च स्वस्ति नो अदिते कृधि ॥
स्वस्ति पन्थाम् अनु चरेम सूर्याचन्द्रमसाव् इव ।
पुनर् ददताघ्नता जानता सं गमेमहि ॥

श्रिये जातः श्रिय आ निर् इयाय श्रियं वयो जरितृभ्यो दधाति ।
श्रियं वसाना अमृतत्वम् आयन् भवन्ति सत्या समिथा मितद्रौ ॥

श्रीर् अस्तु (३) । वर्ष-शतम् पूर्णम् अस्तु । मङ्गलानि भवन्तु । शिवं कर्मास्तु ।

दक्षिण-हस्ते उत्तर-कलशं दक्षिण-हस्ते दक्षिण-कलशं वाम-हस्ते गृहीत्वा ताभ्यां धाराद्वयं सततम् पत्रे निषिञ्चेत् ।

वास्तोष् पते प्रति जानीह्य् अस्मान् स्वावेशो अनमीवो भवा नः ।
यत् त्वेमहे प्रति तन् नो जुषस्व शं न एधि द्विपदे शं चतुष्पदे ॥

वास्तोष् पते शग्मया सँसदा ते सक्षीमहि रण्वया गातुमत्या ।
आवः क्षेम उत योगे वरं नो यूयम् पात स्वस्तिभिः सदा नः ॥

अमीवहा वास्तोष् पते विश्वा रूपाण्य् आविशन् ।
सखा सुशेव एधि नः ॥

नमो रुद्राय वास्तोष्पतये ॥

शिवं शिवं शिवम् ॥

पात्रे पातितेन जलेन पल्लव-दूर्वाभिर् उदङ् मुखास् तिष्ठन्त उपविष्टा वा परिवारम् अभिषिञ्चेयः ।

समुद्रज्येष्ठाः सलिलस्य मध्यात् पुनाना यन्त्य् अनिविशमानाः ।
इन्द्रो या वज्री वृषभो रराद ता आपो देवीर् इह माम् अवन्तु ॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर् बाहुभ्याम् पूष्णो हस्ताभ्याँ सरस्वत्यै वाचो यन्तुर् यन्त्रेणाग्नेस् त्वा साम्राज्येनाभि षिञ्चामीन्द्रस्य बृहस्पतेस् त्वा साम्राज्येनाभि षिञ्चामि ॥
देवस्य त्वा सवितुः प्रसवे । अश्विनोर् बाहुभ्याम् । पूष्णो हस्ताभ्याम् । अश्विनोर् भैषज्येन । तेजसे ब्रह्मवर्चसायअभिषिञ्चामि । देवस्य त्वा सवितुः प्रसवे । अश्विनोर् बाहुभ्याम् । पूष्णो हस्ताभ्याम् । सरस्वत्यै भैषज्येन ॥
देवस्य त्वा सवितुः प्रसवे । अश्विनोर् बहुभ्याम् । पूष्णो हस्ताभ्याम् । इन्द्रस्येन्द्रियेण । श्रियै यशसे बलायाभिषिञ्चामि ॥

ॐ वरुणाय नमः । वरुणम् उद्वासयामि । यथा स्थानम् प्रतिष्ठापयामि शोभनार्थाय क्षेमाय पुनर् आगमनाय च ॥

भूर् भुवः सुवः ।
तच् छंयोर् आवृणीमहे गातुं यज्ञाय गातुं यज्ञपतये ।
दैवी स्वस्तिर् अस्तु नः स्वस्तिर् मानुषेभ्यः ।
ऊर्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे ॥

अथ मातृका-पूजा :-
शुचौ रङ्गवल्ल्याद्य् अलंकृते देशे कृतग्न्य् उत्तारण-प्राण-प्रतिष्ठासु प्रथिमासु अभावे ऽक्षत-पुञ्जेषु वा गौर्यादि-देवता आवाहयेत् ।
गौर्यै नमः । गौरीम् आवाहयामि । पद्मावत्यै नमः । पद्मावतीम् आवाहयामि । शच्यै नमः । शचीम् आवाहयामि । मेधायै नमः । मेधाम् आवाहयामि । सावित्र्यै नमः । सावित्रीम् आवाहयामि । विजयायै नमः । विजयाम् आवाहयामि । जयायई नमः । जयाम् आवाहयामि । देवसेनायै नमः । देवसेनाम् आवाहयामि । स्वधायै नमः । स्वधाम् आवाहयामि । स्वाहायै नमः । स्वाहाम् आवाहयामि । मातृभ्यो नमः । मातॄर् आवाहयामि । लोकमातृभ्यो नमः । लोकमातॄर् आवाहयामि । धृत्यै नमः । धृतिम् आवाहयामि । पुष्ट्यै नमः । पुष्टिम् आवाहयामि । तुष्ट्यै नमः । तुष्टिम् आवाहयामि । कुलदेवतायै नमः । कुलदेवताम् आवाहयामि । ब्राह्म्यै नमः । ब्राह्मीम् आवाहयामि । माहेश्वर्यै नमः । माहेश्वरीम् आवाहयामि । कौमार्यै नमः । कौमारीम् आवाहयामि । वैष्णव्यै नमः । वैष्णवीम् आवाहयामि । वाराह्यै नमः । वाराहीम् आवाहयामि । इन्द्राण्यै नमः । इन्द्राणीम् आवाहयामि । चामुण्डायै नमः । चामुण्डाम् आवाहयामि । गणाधिपाय नमः । गणाधिपम् आवाहयामि ।दुर्गायै नमः । दुर्गाम् आवाहयामि । क्षेत्रपालाय नमः । क्षेत्रपालम् आवाहयामि । वास्तोष्पतये नमः । वास्तोष्पतिम् आवाहयामि ।

इत्य् आवाहयेत् । ततो गौर्याद्य् आवाहित-देवताभ्यो नमो नम इति षोडशोपचारैः प्रपूजयेत् ॥

अथ लघु-देव-पूजा :-
ब्रह्मादि-देवताः प्रियन्ताम् इति पात्रात् जलं क्षिप्त्वा शुचौ देशे चतुरश्रं मण्डलं विधाय रङ्गवल्ल्यादिभिर् अलंकृत्य श्वेताक्षतान् संप्रकीर्य+अद्भिर् अभ्युक्ष्य प्राण-प्रतिष्ठासु प्रथिमासु अभावे ऽक्षत-पुञ्जेषु वा ब्रह्मादि-देवता आवाहयेत् ।
ॐ भूर् ब्रह्माणम् आवाहयामि । ॐ भुवश् चतुर्मुं ब्रह्माणम् आवाहयामि । ॐ सुवः प्रजापतिं ब्रह्माणम् आवाहयामि । ॐ भूर् भुवः सुवर् हिरण्यगर्भं ब्रह्माणम् आवाहयामि ।
इति मध्यमे स्थाने ब्रह्माणम् आवाहयामि ॥

हिरण्यगर्भः सम् अवर्तताग्रे भूतस्य जातः पतिर् एक आसीत् ।
स दाधार पृथिवीं द्याम् उतेमां कस्मै देवाय हविषा विधेम ॥
प्रजापते आगच्छ ।

प्रजापते न त्वद् एतान्य् अन्यो विश्वा जातानि परि ता बभूव ।
यत् कामास् ते जुहुमस् तन् नो अस्तु वयँ स्याम पतयो रयीणाम् ॥
प्रजापतिं तर्पयामि ॥

ॐ भूर् वज्रिणम् आवाहयामि । ॐ भुवः शचीपतिम् आवाहयामि । ॐ सुवर् इन्द्रम् आवाहयामि ।
ॐ भूर् भुवः सुवः शतक्रतुम् आवाहयामि ।
इति पूर्वं दिशि वज्रिणम् आवाहयामि ॥

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवन् छग्धि तव तन् न ऊतये वि द्विषो वि मृधो जहि ॥
इन्द्र आगच्छ ।

स्वस्तिदा विशस् पतिर् वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयंकरः ॥
इन्द्रं तर्पयामि ॥

ॐ भूर् यमम् आवाहयामि । ॐ भुवो वैवस्वतम् आवाहयामि । ॐ सुवः पितृपतिम् आवाहयामि ।
ॐ भूर् भुवः सुवः प्रेतपतिम् आवाहयामि ।
इति दक्षिणस्यां दिशि यमम् आवाहयामि ॥

त्रिकद्रुकेभिः पतति षड् उर्वीर् एकम् इद् बृहत् ।
त्रिष्टुब् गायत्री छन्दाँसि सर्वा ता यम आहिता ॥
यम आगच्छ ।

यद् उलूको वदति मोघम् एतद् यत् कपोतः पदम् अग्नौ कृणोति ।

यस्य दूतः प्रहित एष एतत् तस्मै यमाय नमो अस्तु मृत्यवे ॥
यमं तर्पयामि ॥

ॐ भूर् वरुणम् आवाहयामि । ॐ भुवः प्रचेतसम् आवाहयामि । ॐ सुवः सुरूपिणम् आवाहयामि ।
ॐ भूर् भुवः सुवर् अपाम्पतिम् आवाहयामि ।
इति पश्चिमायाम् दिशि वरुणम् आवाहयामि ॥

इमम् मे वरुण श्रुधी हवम् अद्या च मृडय । त्वाम् अवस्युर् आ चके ॥
वरुण आगच्छ ।

तत् त्वा यामि ब्रह्मणा वन्दमानस् तद् आ शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्य् उरुशँस मा न आयुः प्र मोषीः ॥
वरुणं तर्पयामि ॥

ॐ भूः सोमम् आवाहयामि आवाहयामि । ॐ भुव इन्दुम् आवाहयामि । ॐ सुवर् निशाकरम् आवाहयामि । ॐ भूर् भुवः सुवः शशिनम् आवाहयामि ।
इत्य् उत्तरस्यं दिशि सोमम् आवाहयामि ॥

सोमो धेनुँ सोमो अर्वन्तम् आशुं सोमो वीरं कर्मं ददातु ।
सादन्यं विदथ्यँ सभेयम् पितुःश्रवणं यो ददाशद् अस्मै ॥
सोम आगच्छ ।

अषाढं युत्सु पृतनासु पप्रिँ स्वर्षाम् अप्सां वृजनस्य गोपाम् ।
भरेषुजाँ सुक्षितिँ सुश्रवसं जयन्तं त्वाम् अनु मदेम सोम ॥
सोमं तर्पयामि ।

ॐ आपो हि ष्टा मयोभुवः ... । हिरण्यवर्णाः शुचयः ... मोर्जयन्त्या पुनातु ।

ब्रह्मादीन् संस्नापयेत् । पुष्पाञ्जलि-समर्पणम् ॥

दिशाम् पतीन् नमस्यामि सर्वकाम-फल-प्रदान् ।
कुर्वन्तु सफलं करं कुवन्तु सततं शुभम् ॥

ईश्वरं तर्पयामि । उमां तर्पयामि । स्कन्दं तर्पयामि । विष्णुं तर्पयामि । ब्रह्माणँ स्वयभुवं तर्पयामि । इन्द्रं तर्पयामि । यमं तर्पयामि । कालं तर्पयामि । चित्रगुप्तं तर्पयामि । अपस् तर्पयामि । भूमिं तर्पयामि । विष्णुं तर्पयामि । इन्द्रं तर्पयामि । इन्द्राणीं तर्पयामि । प्रजापतिं तर्पयामि । सर्पान् तर्पयामि । ब्रह्माणं तर्पयामि । गणपतिं तर्पयामि । दुर्गां तर्पयामि । वायुं तर्पयामि । आकाशं तर्पयामि । अश्विनौ तर्पयामि । वास्तोष्पतिं तर्पयामि । क्षेत्रपालं तर्पयामि । इन्द्रं तर्पयामि । अग्निं तर्पयामि । यमं तर्पयामि । निर्ऋत्तिं तर्पयामि । वरुणं तर्पयामि । वायुं तर्पयामि । सोमं तर्पयामि । ईशानं तर्पयामि । वसून्

तर्पयामि । रुद्रान् तर्पयामि । आदित्यान् तर्पयामि । अश्विनौ तर्पयामि । विश्वान् देवान् तर्पयामि । यक्षान् तर्पयामि । सर्पान् तर्पयामि । गन्धर्वाप्सरसस् तर्पयामि । स्कन्दं तर्पयामि । नन्दीश्वरं तर्पयामि । महाकालं तर्पयामि । दक्षं तर्पयामि । दुर्गां तर्पयामि । विष्णुं तर्पयामि । मृत्यु-रोगान् तर्पयामि । गणपतिं तर्पयामि । अपस् तर्पयामि । मरुतस् तर्पयामि । पृथिवीं तर्पयामि । नदीन् तर्पयामि । सागरान् तर्पयामि । मेरुं तर्पयामि । ऐन्द्रीं तर्पयामि । कौमारीं तर्पयामि । ब्राह्मीं तर्पयामि । वाराहीं तर्पयामि । चामुण्डां तर्पयामि । वैष्णवीं तर्पयामि । महेश्वरीं तर्पयामि । वैनायकीं तर्पयामि ॥

पूर्वोक्तैर् ॐ भूर् ब्रह्माणम् इत्य् आद्यैर् मन्त्रैर् उद्वासयामि+इत्य् ऊहितैर् यथाक्रमं देवता उद्वासयेत् ॥